श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

महर्षिबादरायण प्रणीतानि

# ॥ ब्रह्मसूत्राणि ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ ब्रह्मसूत्राणि ॥

## अथ ब्रह्मसूत्रेषु प्रथमस्याध्यायस्य प्रथमः पादः

| 001 जिज्ञासाधिकरणम् | | |
|---|---|---|
| 001 | अथातो ब्रह्मजिज्ञासा | 1.1.1 |

| 002 जन्माद्यधिकरणम् | | |
|---|---|---|
| 002 | जन्माद्यस्य यतः | 1.1.2 |

| 003 शास्त्रयोनित्वाधिकरणम् | | |
|---|---|---|
| 003 | शास्त्रयोनित्वात् | 1.1.3 |

| 004 समन्वयाधिकरणम् | | |
|---|---|---|
| 004 | तत्तु समन्वयात् | 1.1.4 |

| 005 ईक्षत्यधिकरणम् | | |
|---|---|---|
| 005 | ईक्षतेर्नाशब्दम् | 1.1.5 |

| | | |
|---|---|---|
| 006 | गौणश्चेन्नात्मशब्दात् | 1.1.6 |
| 007 | तन्निष्ठस्य मोक्षोपदेशात् | 1.1.7 |
| 008 | हेयत्वावचनाच्च | 1.1.8 |
| 009 | प्रतिज्ञाविरोधात् | 1.1.9 |
| 010 | स्वाप्ययात् | 1.1.10 |
| 011 | गतिसामान्यात् | 1.1.11 |
| 012 | श्रुतत्वाच्च | 1.1.12 |

| 006 आनन्दमयाधिकरणम् | | |
|---|---|---|
| 013 | आनन्दमयोऽभ्यासात् | 1.1.13 |
| 014 | विकारशब्दान्नेति चेन्न प्राचुर्यात् | 1.1.14 |
| 015 | तद्धेतुव्यपदेशाच्च | 1.1.15 |
| 016 | मान्त्रवर्णिकमेव च गीयते | 1.1.16 |
| 017 | नेतरोऽनुपपत्तेः | 1.1.17 |
| 018 | भेदव्यपदेशाच्च | 1.1.18 |
| 019 | कामाच्च नानुमानापेक्षा | 1.1.19 |
| 020 | अस्मिन्नस्य च तद्योगं शास्ति | 1.1.20 |

| 007 अन्तरधिकरणम् | | |
|---|---|---|
| 021 | अन्तस्तद्धर्मोपदेशात् | 1.1.21 |
| 022 | भेदव्यपदेशाच्चान्यः | 1.1.22 |

| 008 आकाशाधिकरणम् | | |
|---|---|---|
| 023 | आकाशस्तल्लिङ्गात् | 1.1.23 |

| 009 प्राणाधिकरणम् | | |
|---|---|---|
| 024 | अत एव प्राणः | 1.1.24 |

| 010 ज्योतिरधिकरणम् | | |
|---|---|---|
| 025 | ज्योतिश्चरणाभिधानात् | 1.1.25 |
| 026 | छन्दोऽभिधानान्नेतिचेन्न तथा चेतोऽर्पणनिगमात् तथा हि दर्शनम् | 1.1.26 |
| 027 | भूतादिपादव्यपदेशोपपत्तेश्चैवम् | 1.1.27 |
| 028 | उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् | 1.1.28 |

| 011 इन्द्रप्राणाधिकरणम् | | |
|---|---|---|
| 029 | प्राणस्तथानुगमात् | 1.1.29 |

| | | |
|---|---|---|
| **030** | न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन् | **1.1.30** |
| **031** | शास्त्रदृष्ट्या तूपदेशो वामदेववत् | **1.1.31** |
| **032** | जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासत्रैविध्यादाश्रितत्वादिह तद्योगात् | **1.1.32** |

इति ब्रह्मसूत्रेषु प्रथमस्याध्यायस्य प्रथमः पादः समाप्तः

*************************************

## अथ ब्रह्मसूत्रेषु प्रथमस्याध्यायस्य द्वितीयः पादः

| **012 सर्वत्रप्रसिद्ध्यधिकरणम्** | | |
|---|---|---|
| **033** | सर्वत्र प्रसिद्धोपदेशात् | **1.2.1** |
| **034** | विवक्षितगुणोपपत्तेश्च | **1.2.2** |
| **035** | अनुपपत्तेस्तु न शारीरः | **1.2.3** |
| **036** | कर्मकर्तृव्यपदेशाच्च | **1.2.4** |
| **037** | शब्दविशेषात् | **1.2.5** |
| **038** | स्मृतेश्च | **1.2.6** |
| **039** | अर्भकौकस्त्वात् तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च | **1.2.7** |
| **040** | सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् | **1.2.8** |

| 013 अत्त्रधिकरणम् | | |
|---|---|---|
| 041 | अत्ता चराचरग्रहणात् | 1.2.9 |
| 042 | प्रकरणाच्च | 1.2.10 |
| 043 | गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् | 1.2.11 |
| 044 | विशेषणाच्च | 1.2.12 |

| 014 अन्तराधिकरणम् | | |
|---|---|---|
| 045 | अन्तर उपपत्तेः | 1.2.13 |
| 046 | स्थानादिव्यपदेशाच्च | 1.2.14 |
| 047 | सुखविशिष्टाभिधानादेव च | 1.2.15 |
| 048 | अत एव च स ब्रह्म | 1.2.16 |
| 049 | श्रुतोपनिषत्कगत्यभिधानाच्च | 1.2.17 |
| 050 | अनवस्थितेरसम्भवाच्च नेतरः | 1.2.18 |

| 015 अन्तर्याम्यधिकरणम् | | |
|---|---|---|
| 051 | अन्तर्याम्यधिदैवाधिलोकादिषु तद्धर्मव्यपदेशात् | 1.2.19 |
| 052 | न च स्मार्तमतद्धर्माभिलापाच्छारीरश्च | 1.2.20 |
| 053 | उभयेऽपि हि भेदेनैनमधीयते | 1.2.21 |

| 016 अदृश्यत्वादिगुणकाधिकरणम् | | |
|---|---|---|
| 054 | अदृश्यत्वादिगुणको धर्मोक्तेः | 1.2.22 |
| 055 | विशेषणभेदव्यपदेशाभ्याञ्च नेतरौ | 1.2.23 |
| 056 | रूपोपन्यासाच्च | 1.2.24 |

| 017 वैश्वानराधिकरणम् | | |
|---|---|---|
| 057 | वैश्वानरस्साधारणशब्दविशेषात् | 1.2.25 |
| 058 | स्मर्यमाणमनुमानं स्यादिति | 1.2.26 |
| 059 | शब्दादिभ्योऽन्तः प्रतिष्ठानाच्च नेति चेन्न तथा दृष्ट्युपदेशादसम्भवात् पुरुषमपि चैनमधीयते | 1.2.27 |
| 060 | अत एव न देवता भूतञ्च | 1.2.28 |
| 061 | साक्षादप्यविरोधं जैमिनिः | 1.2.29 |
| 062 | अभिव्यक्तेरित्याश्मरथ्यः | 1.2.30 |
| 063 | अनुस्मृतेर्बादरिः | 1.2.31 |
| 064 | सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति | 1.2.32 |
| 065 | आमनन्ति चैनमस्मिन् | 1.2.33 |

इति ब्रह्मसूत्रेषु प्रथमस्याध्यायस्य द्वितीयः पादः समाप्तः

**********************************

# अथ ब्रह्मसूत्रेषु प्रथमस्याध्यायस्य तृतीयः पादः

| 018 द्युभ्वद्यधिकरणम् | | |
|---|---|---|
| 066 | द्युभ्वाद्यायतनं स्वशब्दात् | 1.3.1 |
| 067 | मुक्तोपसृप्यव्यपदेशाच्च | 1.3.2 |
| 068 | नानुमानमतच्छब्दात्प्राणभृच्च | 1.3.3 |
| 069 | भेदव्यपदेशात् | 1.3.4 |
| 070 | प्रकरणात् | 1.3.5 |
| 071 | स्थित्यदनाभ्याञ्च | 1.3.6 |

| 019 भूमाधिकरणम् | | |
|---|---|---|
| 072 | भूमा सम्प्रसादादध्युपदेशात् | 1.3.7 |
| 073 | धर्मोपपत्तेश्च | 1.3.8 |

| 020 अक्षराधिकरणम् | | |
|---|---|---|
| 074 | अक्षरमम्बरान्तधृतेः | 1.3.9 |
| 075 | सा च प्रशासनात् | 1.3.10 |
| 076 | अन्यभावव्यावृत्तेश्च | 1.3.11 |

| 021 ईक्षतिकर्माधिकरणम् | | |
|---|---|---|
| 077 | ईक्षतिकर्मव्यपदेशात्सः | 1.3.12 |

| 022 दहराधिकरणम् | | |
|---|---|---|
| 078 | दहर उत्तरेभ्यः | 1.3.13 |
| 079 | गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गञ्च | 1.3.14 |
| 080 | धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः | 1.3.15 |
| 081 | प्रसिद्धेश्च | 1.3.16 |
| 082 | इतरपरामर्शात्स इति चेन्नासम्भवात् | 1.3.17 |
| 083 | उत्तराच्चेदाविर्भूतस्वरूपस्तु | 1.3.18 |
| 084 | अन्यार्थश्च परामर्शः | 1.3.19 |
| 085 | अल्पश्रुतेरिति चेत्तदुक्तम् | 1.3.20 |
| 086 | अनुकृतेस्तस्य च | 1.3.21 |
| 087 | अपि स्मर्यते | 1.3.22 |

| 023 प्रमिताधिकरणम् | | |
|---|---|---|
| 088 | शब्दादेव प्रमितः | 1.3.23 |
| 089 | हृद्यपेक्षया तु मनुष्याधिकारत्वात् | 1.3.24 |

| 024 एतद्गर्भे देवताधिकरणम् | | |
|---|---|---|
| 090 | तदुपर्यपि बादरायणस्सम्भवात् | 1.3.25 |
| 091 | विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् | 1.3.26 |
| 092 | शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम् | 1.3.27 |
| 093 | अत एव च नित्यत्वम् | 1.3.28 |
| 094 | समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च | 1.3.29 |

| 025 एतद्गर्भे मध्वधिकरणम् | | |
|---|---|---|
| 095 | मध्वादिष्वसम्भवादनधिकारं जैमिनिः | 1.3.30 |
| 096 | ज्योतिषि भावाच्च | 1.3.31 |
| 097 | भावं तु बादरायणोऽस्ति हि | 1.3.32 |

| 026 एतद्गर्भे अपशूद्राधिकरणम् | | |
|---|---|---|
| 098 | शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि | 1.3.33 |
| 099 | क्षत्रियत्वगतेश्च | 1.3.34 |
| 100 | उत्तरत्र चैत्ररथेन लिङ्गात् | 1.3.35 |
| 101 | संस्कारपरामर्शात् तदभावाभिलापाच्च | 1.3.36 |
| 102 | तदभावनिर्धारणे च प्रवृत्तेः | 1.3.37 |

| | | |
|---|---|---|
| **103** | श्रवणाध्ययनार्थप्रतिषेधात् | **1.3.38** |
| **104** | स्मृतेश्च | **1.3.39** |

| | | |
|---|---|---|
| | **प्रमिताधिकरणशेषः** | |
| **105** | कम्पनात् | **1.3.40** |
| **106** | ज्योतिर्दर्शनात् | **1.3.41** |

| | | |
|---|---|---|
| | **027 अर्थान्तरत्वादिव्यपदेशाधिकरणम्** | |
| **107** | आकाशोऽर्थान्तरत्वादिव्यपदेशात् | **1.3.42** |
| **108** | सुषुप्त्युत्क्रान्त्योर्भेदेन | **1.3.43** |
| **109** | पत्यादिशब्देभ्यः | **1.3.44** |

इति ब्रह्मसूत्रेषु प्रथमस्याध्यायस्य तृतीयः पादः समाप्तः

*********************************

## अथ ब्रह्मसूत्रेषु प्रथमस्याध्यायस्य चतुर्थः पादः

| | | |
|---|---|---|
| | **028 अनुमानिकाधिकरणम्** | |
| **110** | आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्त-गृहीतेर्दर्शयति च | **1.4.1** |
| **111** | सूक्ष्मं तु तदर्हत्वात् | **1.4.2** |

| | | |
|---|---|---|
| 112 | तदधीनत्वादर्थवत् | 1.4.3 |
| 113 | ज्ञेयत्वावचनाच्च | 1.4.4 |
| 114 | वदतीति चेन्न प्राज्ञो हि प्रकरणात् | 1.4.5 |
| 115 | त्रयाणामेव चैवमुपन्यासः प्रश्नश्च | 1.4.6 |
| 116 | महद्वच्च | 1.4.7 |

| 029 चमसाधिकरणम् | | |
|---|---|---|
| 117 | चमसवदविशेषात् | 1.4.8 |
| 118 | ज्योतिरुपक्रमा तु तथा ह्यधीयत एके | 1.4.9 |
| 119 | कल्पनोपदेशाच्च मध्वादिवदविरोधः | 1.4.10 |

| 030 सङ्ख्योपसङ्ग्रहाधिकरणम् | | |
|---|---|---|
| 120 | न सङ्ख्योपसङ्ग्रहादपि नानाभावादतिरेकाच्च | 1.4.11 |
| 121 | प्राणादयो वाक्यशेषात् | 1.4.12 |
| 122 | ज्योतिषैकेषामसत्यन्ने | 1.4.13 |

| 031 कारणत्वाधिकरणम् | | |
|---|---|---|
| 123 | कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः | 1.4.14 |
| 124 | समाकर्षात् | 1.4.15 |

| 032 जगद्वाचित्वाधिकरणम् | | |
|---|---|---|
| 125 | जगद्वाचित्वात् | 1.4.16 |
| 126 | जीवमुख्यप्राणलिङ्गान्नेति चेत् तद्व्याख्यातम् | 1.4.17 |
| 127 | अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके | 1.4.18 |

| 033 वाक्यान्वयाधिकरणम् | | |
|---|---|---|
| 128 | वाक्यान्वयात् | 1.4.19 |
| 129 | प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः | 1.4.20 |
| 130 | उत्क्रमिष्यत एवम्भावादित्यौडुलोमिः | 1.4.21 |
| 131 | अवस्थितेरिति काशकृत्स्नः | 1.4.22 |

| 034 प्रकृत्यधिकरणम् | | |
|---|---|---|
| 132 | प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् | 1.4.23 |
| 133 | अभिध्योपदेशाच्च | 1.4.24 |
| 134 | साक्षाच्चोभयाम्नानात् | 1.4.25 |
| 135 | आत्मकृतेः | 1.4.26 |
| 136 | परिणामात् | 1.4.27 |
| 137 | योनिश्च हि गीयते | 1.4.28 |

| | | |
|---|---|---|
| | **035 सर्वव्याख्यानाधिकरणम्** | |
| **138** | एतेन सर्वे व्याख्याता व्याख्याताः | **1.4.29** |

इति ब्रह्मसूत्रेषु प्रथमस्याध्यायस्य चतुर्थः पादः समाप्तः

**********************************

## अथ ब्रह्मसूत्रेषु द्वितीयस्याध्यायस्य प्रथमः पादः

| | | |
|---|---|---|
| | **036 स्मृत्यधिकरणम्** | |
| **139** | स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाश-दोषप्रसङ्गात् | **2.1.1** |
| **140** | इतरेषाञ्चानुपलब्धेः | **2.1.2** |

| | | |
|---|---|---|
| | **037 योगप्रत्युक्त्यधिकरणम्** | |
| **141** | एतेन योगः प्रत्युक्तः | **2.1.3** |

| | | |
|---|---|---|
| | **038 विलक्षणत्वाधिकरणम्** | |
| **142** | न विलक्षणत्वादस्य तथात्वं च शब्दात् | **2.1.4** |
| **143** | अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् | **2.1.5** |
| **144** | दृश्यते तु | **2.1.6** |
| **145** | असदिति चेन्न प्रतिषेधमात्रत्वात् | **2.1.7** |

| | | |
|---|---|---|
| **146** | अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् | **2.1.8** |
| **147** | न तु दृष्टान्तभावात् | **2.1.9** |
| **148** | स्वपक्षदोषाच्च | **2.1.10** |
| **149** | तर्काप्रतिष्ठानादपि | **2.1.11** |
| **150** | अन्यथानुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः | **2.1.12** |

| **039 शिष्टापरिग्रहाधिकरणम्** | | |
|---|---|---|
| **151** | एतेन शिष्टापरिग्रहा अपि व्याख्याताः | **2.1.13** |

| **040 भोक्त्रापत्त्यधिकरणम्** | | |
|---|---|---|
| **152** | भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् | **2.1.14** |

| **041 आरम्भणाधिकरणम्** | | |
|---|---|---|
| **153** | तदनन्यत्वमारम्भणशब्दादिभ्यः | **2.1.15** |
| **154** | भावे चोपलब्धेः | **2.1.16** |
| **155** | सत्त्वाच्चापरस्य | **2.1.17** |
| **156** | असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषाद्युक्तेश्शब्दान्तराच्च | **2.1.18** |
| **157** | पटवच्च | **2.1.19** |

| | | |
|---|---|---|
| 158 | यथा च प्राणादिः | 2.1.20 |

| 042 इतरव्यपदेशाधिकरणम् | | |
|---|---|---|
| 159 | इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः | 2.1.21 |
| 160 | अधिकं तु भेदनिर्देशात् | 2.1.22 |
| 161 | अश्मादिवच्च तदनुपपत्तिः | 2.1.23 |

| 043 उपसंहारदर्शनाधिकरणम् | | |
|---|---|---|
| 162 | उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि | 2.1.24 |
| 163 | देवादिवदपि लोके | 2.1.25 |

| 044 कृत्स्नप्रसक्त्यधिकरणम् | | |
|---|---|---|
| 164 | कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा | 2.1.26 |
| 165 | श्रुतेस्तु शब्दमूलत्वात् | 2.1.27 |
| 166 | आत्मनि चैवं विचित्राश्च हि | 2.1.28 |
| 167 | स्वपक्षदोषाच्च | 2.1.29 |
| 168 | सर्वोपेता च तद्दर्शनात् | 2.1.30 |
| 169 | विकरणत्वान्नेति चेत्तदुक्तम् | 2.1.31 |

| 045 प्रयोजनवत्त्वाधिकरणम् | | |
|---|---|---|
| 170 | न प्रयोजनत्त्वात् | 2.1.32 |
| 171 | लोकवत्तु लीलाकैवल्यम् | 2.1.33 |
| 172 | वैष्यम्यनैर्घृण्ये न सापेक्षत्वात् तथाहि दर्शयति | 2.1.34 |
| 173 | न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च | 2.1.35 |
| 174 | सर्वधर्मोपपत्तेश्च | 2.1.36 |

इति ब्रह्मसूत्रेषु द्वितीयस्याध्यायस्य प्रथमः पादः समाप्तः

***********************************

## अथ ब्रह्मसूत्रेषु द्वितीयस्याध्यायस्य द्वितीयः पादः

| 046 रचनानुपपत्त्यधिकरणम् | | |
|---|---|---|
| 175 | रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च | 2.2.1 |
| 176 | पयोऽम्बुवच्चेत्तत्रापि | 2.2.2 |
| 177 | व्यतिरेकानवस्थितेश्चानपेक्षत्वात् | 2.2.3 |
| 178 | अन्यत्राभावाच्च न तृणादिवत् | 2.2.4 |
| 179 | पुरुषाश्मवदिति चेत्तथापि | 2.2.5 |
| 180 | अङ्गित्वानुपपत्तेश्च | 2.2.6 |
| 181 | अन्यथानुमितौ च ज्ञशक्तिवियोगात् | 2.2.7 |

| | | |
|---|---|---|
| **182** | अभ्युपगमेऽप्यर्थाभावात् | **2.2.8** |
| **183** | विप्रतिषेधाच्चासमञ्जसम् | **2.2.9** |

| **047 महद्दीर्घाधिकरणम्** | | |
|---|---|---|
| **184** | महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् | **2.2.10** |
| **185** | उभयथापि न कर्मातस्तदभावः | **2.2.11** |
| **186** | समवायाभ्युपगमाच्च साम्यादनवस्थितेः | **2.2.12** |
| **187** | नित्यमेव च भावात् | **2.2.13** |
| **188** | रूपादिमत्त्वाच्च विपर्ययो दर्शनात् | **2.2.14** |
| **189** | उभयथा च दोषात् | **2.2.15** |
| **190** | अपरिग्रहाच्चात्यन्तमनपेक्षा | **2.2.16** |

| **048 समुदायाधिकरणम्** | | |
|---|---|---|
| **191** | समुदाय उभयहेतुकेऽपि तदप्राप्तिः | **2.2.17** |
| **192** | इतरेतरप्रत्ययत्वादुपपन्नमिति चेन्न सङ्घातभावानिमित्तत्वात् | **2.2.18** |
| **193** | उत्तरोत्पादे च पूर्वनिरोधात् | **2.2.19** |
| **194** | असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा | **2.2.20** |
| **195** | प्रतिसङ्ख्याप्रतिसङ्ख्यानिरोधाप्राप्तिरविच्छेदात् | **2.2.21** |

| | | |
|---|---|---|
| **196** | उभयथा च दोषात् | **2.2.22** |
| **197** | आकाशे चाविशेषात् | **2.2.23** |
| **198** | अनुस्मृतेश्च | **2.2.24** |
| **199** | नासतोऽदृष्टत्वात् | **2.2.25** |
| **200** | उदासीनानामपि चैवं सिद्धिः | **2.2.26** |

| | | |
|---|---|---|
| | **049 उपलब्ध्यधिकरणम्** | |
| **201** | नाभाव उपलब्धेः | **2.2.27** |
| **202** | वैधर्म्याच्च न स्वप्नादिवत् | **2.2.28** |
| **203** | न भावोऽनुपलब्धेः | **2.2.29** |

| | | |
|---|---|---|
| | **050 सर्वथानुपपत्त्यधिकरणम्** | |
| **204** | सर्वथानुपपत्तेश्च | **2.2.30** |

| | | |
|---|---|---|
| | **051 एकस्मिन्नसम्भवाधिकरणम्** | |
| **205** | नैकस्मिन्नसम्भवात् | **2.2.31** |
| **206** | एवञ्चात्माकार्त्स्न्यम् | **2.2.32** |
| **207** | न च पर्यायादप्यविरोधो विकारादिभ्यः | **2.2.33** |
| **208** | अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः | **2.2.34** |

| 052 पशुपत्यधिकरणम् | | |
|---|---|---|
| 209 | पत्युरसामञ्जस्यात् | 2.2.35 |
| 210 | अधिष्ठानानुपपत्तेश्च | 2.2.36 |
| 211 | करणवच्चेन्न भोगादिभ्यः | 2.2.37 |
| 212 | अन्तवत्त्वमसर्वज्ञता वा | 2.2.38 |

| 053 उत्पत्त्यसम्भवाधिकरणम् | | |
|---|---|---|
| 213 | उत्पत्त्यसम्भवात् | 2.2.39 |
| 214 | न च कर्तुः करणम् | 2.2.40 |
| 215 | विज्ञानादिभावे वा तदप्रतिषेधः | 2.2.41 |
| 216 | विप्रतिषेधाच्च | 2.2.42 |

इति ब्रह्मसूत्रेषु द्वितीयस्याध्यायस्य द्वितीयः पादः समाप्तः

**********************************

## अथ ब्रह्मसूत्रेषु द्वितीयस्याध्यायस्य तृतीयः पादः

| 054 वियदधिकरणम् | | |
|---|---|---|
| 217 | न वियदश्रुतेः | 2.3.1 |
| 218 | अस्ति तु | 2.3.2 |

| | | |
|---|---|---|
| 219 | गौण्यसम्भवाच्छब्दाच्च | 2.3.3 |
| 220 | स्याच्चैकस्य ब्रह्मशब्दवत् | 2.3.4 |
| 221 | प्रतिज्ञाहानिरव्यतिरेकात् | 2.3.5 |
| 222 | शब्देभ्यः | 2.3.6 |
| 223 | यावद्विकारं तु विभागो लोकवत् | 2.3.7 |
| 224 | एतेन मातरिश्वा व्याख्यातः | 2.3.8 |
| 225 | असम्भवस्तु सतोऽनुपपत्तेः | 2.3.9 |

| **055 तेजोऽधिकरणम्** | | |
|---|---|---|
| 226 | तेजोऽतस्तथा ह्याह | 2.3.10 |
| 227 | आपः | 2.3.11 |
| 228 | पृथिवी | 2.3.12 |
| 229 | अधिकाररूपशब्दान्तरेभ्यः | 2.3.13 |
| 230 | तदभिध्यानादेव तु तल्लिङ्गात्सः | 2.3.14 |
| 231 | विपर्ययेण तु क्रमोऽत उपपद्यते च | 2.3.15 |
| 232 | अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् | 2.3.16 |
| 233 | चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशोऽभाक्तस्तद्भाव-भावित्वात् | 2.3.17 |

| 056 आत्माधिकरणम् | | |
|---|---|---|
| 234 | नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः | 2.3.18 |

| 057 ज्ञाधिकरणम् | | |
|---|---|---|
| 235 | ज्ञोऽत एव | 2.3.19 |
| 236 | उत्क्रान्तिगत्यागतीनाम् | 2.3.20 |
| 237 | स्वात्मना चोत्तरयोः | 2.3.21 |
| 238 | नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् | 2.3.22 |
| 239 | स्वशब्दोन्मानाभ्यां च | 2.3.23 |
| 240 | अविरोधश्चन्दनवत् | 2.3.24 |
| 241 | अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृद्धि हि | 2.3.25 |
| 242 | गुणाद्वालोकवत् | 2.3.26 |
| 243 | व्यतिरेको गन्धवत्तथा च दर्शयति | 2.3.27 |
| 244 | पृथगुपदेशात् | 2.3.28 |
| 245 | तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् | 2.3.29 |
| 246 | यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् | 2.3.30 |
| 247 | पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् | 2.3.31 |
| 248 | नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा | 2.3.32 |

| 058 कर्त्रधिकरणम् | | |
|---|---|---|
| 249 | कर्ता शास्त्रार्थवत्त्वात् | 2.3.33 |
| 250 | उपादानाद्विहारोपदेशाच्च | 2.3.34 |
| 251 | व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः | 2.3.35 |
| 252 | उपलब्धिवदनियमः | 2.3.36 |
| 253 | शक्तिविपर्ययात् | 2.3.37 |
| 254 | समाध्यभावाच्च | 2.3.38 |
| 255 | यथा च तक्षोभयथा | 2.3.39 |

| 059 परयत्ताधिकरणम् | | |
|---|---|---|
| 256 | परात्तु तच्छ्रुतेः | 2.3.40 |
| 257 | कृतप्रयत्नोपेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः | 2.3.41 |

| 060 अंशाधिकरणम् | | |
|---|---|---|
| 258 | अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके | 2.3.42 |
| 259 | मन्त्रवर्णात् | 2.3.43 |
| 260 | अपि स्मर्यते | 2.3.44 |
| 261 | प्रकाशादिवत्तु नैवं परः | 2.3.45 |

| | | |
|---|---|---|
| **262** | स्मरन्ति च | **2.3.46** |
| **263** | अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत् | **2.3.47** |
| **264** | असन्ततेश्चाव्यतिकरः | **2.3.48** |
| **265** | आभास एव च | **2.3.49** |
| **266** | अदृष्टानियमात् | **2.3.50** |
| **267** | अभिसन्ध्यादिष्वपि चैवम् | **2.3.51** |
| **268** | प्रदेशभेदादिति चेन्नान्तर्भावात् | **2.3.52** |

इति ब्रह्मसूत्रेषु द्वितीयस्याध्यायस्य तृतीयः पादः समाप्तः

**********************************

## अथ ब्रह्मसूत्रेषु द्वितीयस्याध्यायस्य चतुर्थ पादः

| **061 प्राणोत्पत्त्यधिकरणम्** | | |
|---|---|---|
| **269** | तथा प्राणाः | **2.4.1** |
| **270** | गौण्यसम्भवात् तत्प्राक्श्रुतेश्च | **2.4.2** |
| **271** | तत्पूर्वकत्वाद्वाचः | **2.4.3** |

| **062 सप्तगत्यधिकरणम्** | | |
|---|---|---|
| **272** | सप्तगतेर्विशेषितत्वाच्च | **2.4.4** |
| **273** | हस्तादयस्तु स्थितेऽतो नैवम् | **2.4.5** |

| 063 प्राणाणुत्वाधिकरणम् | | |
|---|---|---|
| **274** | अणवश्च | **2.4.6** |
| **275** | श्रेष्ठश्च | **2.4.7** |

| 064 वायुक्रियाधिकरणम् | | |
|---|---|---|
| **276** | न वायुक्रिये पृथगुपदेशात् | **2.4.8** |
| **277** | चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः | **2.4.9** |
| **278** | अकरणत्वाच्च न दोषस्तथा हि दर्शयति | **2.4.10** |
| **279** | पञ्चवृत्तिर्मनोवद्व्यपदिश्यते | **2.4.11** |

| 065 श्रेष्ठाणुत्वाधिकरणम् | | |
|---|---|---|
| **280** | अणुश्च | **2.4.12** |

| 066 ज्योतिराद्यधिष्ठनाधिकरणम् | | |
|---|---|---|
| **281** | ज्योतिराद्यधिष्ठानं तु तदामननात् प्राणवता शब्दात् | **2.4.13** |
| **282** | तस्य च नितयत्वात् | **2.4.14** |

| 067 इन्द्रियाधिकरणम् | | |
|---|---|---|
| **283** | त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् | **2.4.15** |

| | | |
|---|---|---|
| 284 | भेदश्रुतेर्वैलक्षण्याच्च | 2.4.16 |

| 068 संज्ञामूर्तिक्लृप्त्यधिकरणम् | | |
|---|---|---|
| 285 | संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् | 2.4.17 |
| 286 | मांसादि भौमं यथाशब्दमितरयोश्च | 2.4.18 |
| 287 | वैशेष्यात्तु तद्वादस्तद्वादः | 2.4.19 |

इति ब्रह्मसूत्रेषु द्वितीयस्याध्यायस्य चतुर्थः पादः समाप्तः

**********************************

## अथ ब्रह्मसूत्रेषु तृतीयस्याध्यायस्य प्रथमः पादः

| 069 तदन्तरप्रतिपत्त्यधिकरणम् | | |
|---|---|---|
| 288 | तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम् | 3.1.1 |
| 289 | त्र्यात्मकत्वात्तु भूयस्त्वात् | 3.1.2 |
| 290 | प्राणगतेश्च | 3.1.3 |
| 291 | अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् | 3.1.4 |
| 292 | प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः | 3.1.5 |
| 293 | अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः | 3.1.6 |
| 294 | भाक्तं वाऽनात्मवित्त्वात्तथा हि दर्शयति | 3.1.7 |

| 070 कृतात्ययाधिकरणम् | | |
|---|---|---|
| 295 | कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च | 3.1.8 |
| 296 | चरणादिति चेन्न तदुपलक्षणार्थेति कार्ष्णाजनिः | 3.1.9 |
| 297 | आनर्थक्यमिति चेन्न तदपेक्षत्वात् | 3.1.10 |
| 298 | सुकृतदुष्कृते एवेति तु बादरिः | 3.1.11 |

| 071 अनिष्टादिकार्यधिकरणम् | | |
|---|---|---|
| 299 | अनिष्टादिकारिणामपि च श्रुतम् | 3.1.12 |
| 300 | संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् | 3.1.13 |
| 301 | स्मरन्ति च | 3.1.14 |
| 302 | अपि सप्त | 3.1.15 |
| 303 | तत्रापि च तद्व्यापारादविरोधः | 3.1.16 |
| 304 | विद्याकर्मणोरिति तु प्रकृतत्वात् | 3.1.17 |
| 305 | न तृतीये तथोपलब्धेः | 3.1.18 |
| 306 | स्मर्यतेऽपि च लोके | 3.1.19 |
| 307 | दर्शनाच्च | 3.1.20 |
| 308 | तृतीयशब्दावरोधस्संशोकजस्य | 3.1.21 |

| 072 तत्स्वभाव्यपत्त्यधिकरणम् | | |
|---|---|---|
| 309 | तत्स्वाभाव्यापत्तिरुपपत्तेः | 3.1.22 |

| 073 नातिचिराधिकरणम् | | |
|---|---|---|
| 310 | नातिचिरेण विशेषात् | 3.1.23 |

| 074 अन्याधिष्ठिताधिकरणम् | | |
|---|---|---|
| 311 | अन्याधिष्ठिते पूर्ववदभिलापात् | 3.1.24 |
| 312 | अशुद्धमिति चेन्न शब्दात् | 3.1.25 |
| 313 | रेतस्सिग्योगोऽथ | 3.1.26 |
| 314 | योनेश्शरीरम् | 3.1.27 |

इति ब्रह्मसूत्रेषु तृतीयस्याध्यायस्य प्रथमः पादः समाप्तः

*********************************

## अथ ब्रह्मसूत्रेषु तृतीयस्याध्यायस्य द्वितीयः पादः

| 075 सन्ध्यधिकरणम् | | |
|---|---|---|
| 315 | सन्ध्ये सृष्टिराह हि | 3.2.1 |
| 316 | निर्मातारञ्चैके पुत्रादयश्च | 3.2.2 |
| 317 | मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् | 3.2.3 |

| | | |
|---|---|---|
| 318 | पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ | 3.2.4 |
| 319 | देहयोगाद्वा सोऽपि | 3.2.5 |
| 320 | सूचकश्च हि श्रुतेराचक्षते च तद्विदः | 3.2.6 |

| 076 तदभावाधिकरणम् | | |
|---|---|---|
| 321 | तदभावो नाडीषु तच्छ्रुतेरात्मनि च | 3.2.7 |
| 322 | अतः प्रबोधोऽस्मात् | 3.2.8 |

| 077 कर्मानुस्मृतिशब्दविध्यधिकरणम् | | |
|---|---|---|
| 323 | स एव तु कर्मानुस्मृतिशब्दविधिभ्यः | 3.2.9 |

| 078 मुग्धाधिकरणम् | | |
|---|---|---|
| 324 | मुग्धेऽर्धसम्पत्तिः परिशेषात् | 3.2.10 |

| 079 उभयलिङ्गाधिकरणम् | | |
|---|---|---|
| 325 | न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि | 3.2.11 |
| 326 | भेदादिति चेन्न प्रत्येकमतद्वचनात् | 3.2.12 |
| 327 | अपि चैवमेके | 3.2.13 |
| 328 | अरूपवदेव हि तत्प्रधानत्वात् | 3.2.14 |

| | | |
|---|---|---|
| **329** | प्रकाशवच्चावैयर्थ्यात् | **3.2.15** |
| **330** | आह च तन्मात्रम् | **3.2.16** |
| **331** | दर्शयति चाथो अपि स्मर्यते | **3.2.17** |
| **332** | अत एव चोपमा सूर्यकादिवत् | **3.2.18** |
| **333** | अम्बुवदग्रहणात्तु न तथात्वम् | **3.2.19** |
| **334** | वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवं दर्शनाच्च | **3.2.20** |
| **335** | प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः | **3.2.21** |
| **336** | तदव्यक्तमाह हि | **3.2.22** |
| **337** | अपि संराधने प्रत्यक्षानुमानाभ्याम् | **3.2.23** |
| **338** | प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् | **3.2.24** |
| **339** | अतोऽनन्तेन तथा हि लिङ्गम् | **3.2.25** |

| **080 अहिकुण्डलाधिकरणम्** | | |
|---|---|---|
| **340** | उभयव्यपदेशात्त्वहिकुण्डलवत् | **3.2.26** |
| **341** | प्रकाशाश्रयवद्वा तेजस्त्वात् | **3.2.27** |
| **342** | पूर्ववद्वा | **3.2.28** |
| **343** | प्रतिषेधाच्च | **3.2.29** |

| 081 पराधिकरणम् | | |
|---|---|---|
| 344 | परमतस्सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः | 3.2.30 |
| 345 | सामान्यत्तु | 3.2.31 |
| 346 | बुद्ध्यर्थः पादवत् | 3.2.32 |
| 347 | स्थानविशेषात्प्रकाशादिवत् | 3.2.33 |
| 348 | उपपत्तेश्च | 3.2.34 |
| 349 | तथान्यप्रतिषेधात् | 3.2.35 |
| 350 | अनेन सर्वगतत्वमायामशब्दादिभ्यः | 3.2.36 |

| 082 फलाधिकरणम् | | |
|---|---|---|
| 351 | फलमत उपपत्तेः | 3.2.37 |
| 352 | श्रुतत्वाच्च | 3.2.38 |
| 353 | धर्मं जैमिनिरत एव | 3.2.39 |
| 354 | पूर्वं तु बादरायणो हेतुव्यपदेशात् | 3.2.40 |

इति ब्रह्मसूत्रेषु तृतीयस्याध्यायस्य द्वितीयः पादः समाप्तः

**********************************

# अथ ब्रह्मसूत्रेषु तृतीयस्याध्यायस्य तृतीयः पादः

| 083 सर्ववेदान्तप्रत्ययाधिकरणम् | | |
|---|---|---|
| 355 | सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् | 3.3.1 |
| 356 | भेदान्नेति चेदेकस्यामपि | 3.3.2 |
| 357 | स्वाध्यायस्य तथात्वे हि समाचारेऽधिकाराच्च सववच्च तन्नियमः | 3.3.3 |
| 358 | दर्शयति च | 3.3.4 |
| 359 | उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च | 3.3.5 |

| 084 अन्यथत्वाधिकरणम् | | |
|---|---|---|
| 360 | अन्यथात्वं च शब्दादिति चेन्नाविशेषात् | 3.3.6 |
| 361 | न वा प्रकरणभेदात्परोवरीयस्त्वादिवत् | 3.3.7 |
| 362 | संज्ञातश्चेत्तदुक्तमस्ति तु तदपि | 3.3.8 |
| 363 | व्याप्तेश्च समञ्जसम् | 3.3.9 |

| 085 सर्वाभेदाधिकरणम् | | |
|---|---|---|
| 364 | सर्वाभेदादन्यत्रेमे | 3.3.10 |

| 086 आनन्दाद्यधिकरणम् | | |
|---|---|---|
| 365 | आनन्दादयः प्रधानस्य | 3.3.11 |
| 366 | प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे | 3.3.12 |
| 367 | इतरे त्वर्थसामान्यात् | 3.3.13 |
| 368 | आध्यानाय प्रयोजनाभावात् | 3.3.14 |
| 369 | आत्मशब्दाच्च | 3.3.15 |
| 370 | आत्मगृहीतिरितरवदुत्तरात् | 3.3.16 |
| 371 | अन्वयादिति चेत्स्यादवधारणात् | 3.3.17 |

| 087 कार्याख्यानाधिकरणम् | | |
|---|---|---|
| 372 | कार्याख्यानादपूर्वम् | 3.3.18 |

| 088 समानाधिकरणम् | | |
|---|---|---|
| 373 | समान एवञ्चाभेदात् | 3.3.19 |

| 089 सम्बन्धाधिकरणम् | | |
|---|---|---|
| 374 | सम्बन्धादेवमन्यत्रापि | 3.3.20 |
| 375 | न वा विशेषात् | 3.3.21 |
| 376 | दर्शयति च | 3.3.22 |

| 090 सम्भृत्यधिकरणम् | | |
|---|---|---|
| 377 | सम्भृतिद्युव्याप्त्यपि चातः | 3.3.23 |

| 091 पुरुषविद्याधिकरणम् | | |
|---|---|---|
| 378 | पुरुषविद्यायामपि चेतरेषामनाम्नानात् | 3.3.24 |

| 092 वेधाद्यधिकरणम् | | |
|---|---|---|
| 379 | वेधाद्यर्थभेदात् | 3.3.25 |

| 093 हन्याधिकरणम् | | |
|---|---|---|
| 380 | हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दस्स्तुत्युपगान-वत्तदुक्तम् | 3.3.26 |

| 094 साम्परायाधिकरणम् | | |
|---|---|---|
| 381 | साम्पराये तर्तव्याभावात् तथा ह्यन्ये | 3.3.27 |
| 382 | छन्दत उभयाविरोधात् | 3.3.28 |
| 383 | गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः | 3.3.29 |
| 384 | उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् | 3.3.30 |

| | | |
|---|---|---|
| 385 | यावदधिकारमवस्थितिराधिकारिकाणाम् | 3.3.31 |

| | | |
|---|---|---|
| | **095 अनियमाधिकरणम्** | |
| 386 | अनियमस्सर्वेषामविरोधश्शब्दानुमानाभ्याम् | 3.3.32 |

| | | |
|---|---|---|
| | **096 अक्षरध्यधिकरणम्** | |
| 387 | अक्षरधियां त्ववरोधस्सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् | 3.3.33 |
| 388 | इयदामननात् | 3.3.34 |

| | | |
|---|---|---|
| | **097 अन्तरत्वाधिकरणम्** | |
| 389 | अन्तराभूतग्रामवत् स्वात्मनोऽन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत् | 3.3.35 |
| 390 | व्यतिहारो विशिंषन्ति हीतरवत् | 3.3.36 |
| 391 | सैव हि सत्यादयः | 3.3.37 |

| | | |
|---|---|---|
| | **098 कामाद्यधिकरणम्** | |
| 392 | कामादीतरत्र तत्र चायतनादिभ्यः | 3.3.38 |
| 393 | आदारादलोपः | 3.3.39 |
| 394 | उपस्थितेऽतस्तद्वचनात् | 3.3.40 |

| 099 तन्निर्धारणानियमाधिकरणम् | | |
|---|---|---|
| 395 | तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् | 3.3.41 |

| 100 प्रदानाधिकरणम् | | |
|---|---|---|
| 396 | प्रदानवदेव तदुक्तम् | 3.3.42 |

| 101 लिङ्गभूयस्त्वाधिकरणम् | | |
|---|---|---|
| 397 | लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि | 3.3.43 |

| 102 पूर्वविकल्पाधिकरणम् | | |
|---|---|---|
| 398 | पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत् | 3.3.44 |
| 399 | अतिदेशाच्च | 3.3.45 |
| 400 | विद्यैव तु निर्धारणाद्दर्शनाच्च | 3.3.46 |
| 401 | श्रुत्यादिबलीयस्त्वाच्च न बाधः | 3.3.47 |
| 402 | अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम् | 3.3.48 |
| 403 | न सामान्यादप्युपलब्धेर्मृत्युवन्नहि लोकापत्तिः | 3.3.49 |
| 404 | परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः | 3.3.50 |

| 103 शरीरेभावाधिकरणम् | | |
|---|---|---|
| 405 | एक आत्मनश्शरीरे भावात् | 3.3.51 |
| 406 | व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिवत् | 3.3.52 |

| 104 अङ्गावबद्धाधिकरणम् | | |
|---|---|---|
| 407 | अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् | 3.3.53 |
| 408 | मन्त्रादिवद्वाऽविरोधः | 3.3.54 |

| 105 भूमज्यायस्त्वाधिकरणम् | | |
|---|---|---|
| 409 | भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति | 3.3.55 |

| 106 शब्दादिभेदाधिकरणम् | | |
|---|---|---|
| 410 | नाना शब्दादिभेदात् | 3.3.56 |

| 107 विकल्पाधिकरणम् | | |
|---|---|---|
| 411 | विकल्पोऽविशिष्टफलत्वात् | 3.3.57 |
| 412 | काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् | 3.3.58 |

| 108 यथाश्रयभवाधिकरणम् | | |
|---|---|---|
| 413 | अङ्गेषु यथाश्रयभावः | 3.3.59 |
| 414 | शिष्टेश्च | 3.3.60 |
| 415 | समाहारात् | 3.3.61 |
| 416 | गुणसाधारण्यश्रुतेश्च | 3.3.62 |
| 417 | न वा तत्सहभावश्रुतेः | 3.3.63 |
| 418 | दर्शनाच्च | 3.3.64 |

इति ब्रह्मसूत्रेषु तृतीयस्याध्यायस्य तृतीयः पादः समाप्तः

***********************************

## अथ ब्रह्मसूत्रेषु तृतीयस्याध्यायस्य चतुर्थः पादः

| 109 पुरुषार्थाधिकरणम् | | |
|---|---|---|
| 419 | पुरुषार्थोऽतश्शब्दादिति बादरायणः | 3.4.1 |
| 420 | शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः | 3.4.2 |
| 421 | आचारदर्शनात् | 3.4.3 |
| 422 | तच्छ्रुतेः | 3.4.4 |
| 423 | समन्वारम्भणात् | 3.4.5 |
| 424 | तद्वतो विधानात् | 3.4.6 |

| | | |
|---|---|---|
| 425 | नियमात् | 3.4.7 |
| 426 | अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् | 3.4.8 |
| 427 | तुल्यं तु दर्शनम् | 3.4.9 |
| 428 | असार्वत्रिकी | 3.4.10 |
| 429 | विभागश्शतवत् | 3.4.11 |
| 430 | अध्ययनमात्रवतः | 3.4.12 |
| 431 | नाविशेषात् | 3.4.13 |
| 432 | स्तुतयेऽनुमतिर्वा | 3.4.14 |
| 433 | कामकारेण चैके | 3.4.15 |
| 434 | उपमर्दञ्च | 3.4.16 |
| 435 | ऊर्ध्वरेतस्सु च शब्दे हि | 3.4.17 |
| 436 | परामर्शं जैमिनिरचोदनाच्चापवदिति हि | 3.4.18 |
| 437 | अनुष्ठेयं बादरायणस्साम्यश्रुतेः | 3.4.19 |
| 438 | विधिर्वा धारणवत् | 3.4.20 |

| **110 स्तुतिमात्राधिकरणम्** | | |
|---|---|---|
| 439 | स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् | 3.4.21 |
| 440 | भावशब्दाच्च | 3.4.22 |

| 111 परिप्लवाधिकरणम् | | |
|---|---|---|
| 441 | पारिप्लवार्था इति चेन्न विशेषितत्वात् | 3.4.23 |
| 442 | तथा चैकवाक्योपबन्धात् | 3.4.24 |

| 112 अग्नीन्धनाधिकरणम् | | |
|---|---|---|
| 443 | अत एव चाग्नीन्धनाद्यनपेक्षा | 3.4.25 |

| 113 सर्वापेक्षाधिकरणम् | | |
|---|---|---|
| 444 | सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् | 3.4.26 |

| 114 शमदमाद्यधिकरणम् | | |
|---|---|---|
| 445 | शमदमाद्युपेतस्स्यात् तथापि तु तद्विधेस्तदङ्गतया तेषामप्यश्यानुष्ठेयत्वात् | 3.4.27 |

| 115 सर्वान्नानुमत्यधिकरणम् | | |
|---|---|---|
| 446 | सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् | 3.4.28 |
| 447 | अबाधाच्च | 3.4.29 |
| 448 | अपि स्मर्यते | 3.4.30 |
| 449 | शब्दश्चातोऽकामकारे | 3.4.31 |

| 116 विहितत्वाधिकरणम् | | |
|---|---|---|
| 450 | विहितत्वाच्चाश्रमकर्मापि | 3.4.32 |
| 451 | सहकारित्वेन च | 3.4.33 |
| 452 | सर्वथापि त एवोभयलिङ्गात् | 3.4.34 |
| 453 | अनभिभवञ्च दर्शयति | 3.4.35 |

| 117 विधुराधिकरणम् | | |
|---|---|---|
| 454 | अन्तरा चापि तु तद्दृष्टेः | 3.4.36 |
| 455 | अपि स्मर्यते | 3.4.37 |
| 456 | विशेषणानुग्रहश्च | 3.4.38 |
| 457 | अतस्त्वितरज्ज्यायो लिङ्गाच्च | 3.4.39 |

| 118 तद्भूताधिकरणम् | | |
|---|---|---|
| 458 | तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः | 3.4.40 |
| 459 | न चाधिकारिकमपि पतनानुमानात्तदयोगात् | 3.4.41 |
| 460 | उपपूर्वमपीत्येके भावमशनवत्तदुक्तम् | 3.4.42 |
| 461 | बहिस्तूभयथापि स्मृतेराचाराच्च | 3.4.43 |

| | | |
|---|---|---|
| | **119 स्वाभ्याधिकरणम्** | |
| **462** | स्वामिनः फलश्रुतेरित्यात्रेयः | **3.4.44** |
| **463** | आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते | **3.4.45** |

| | | |
|---|---|---|
| | **120 सहकार्यन्तरविध्यधिकरणम्** | |
| **464** | सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् | **3.4.46** |
| **465** | कृत्स्नभावात्तु गृहिणोपसंहारः | **3.4.47** |
| **466** | मौनवदितरेषामप्युपदेशात् | **3.4.48** |

| | | |
|---|---|---|
| | **121 अनाविष्काराधिकरणम्** | |
| **467** | अनाविष्कुर्वन्नन्वयात् | **3.4.49** |

| | | |
|---|---|---|
| | **122 ऐहिकाधिकरणम्** | |
| **468** | ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् | **3.4.50** |

| | | |
|---|---|---|
| | **123 मुक्तिफलाधिकरणम्** | |
| **469** | एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः | **3.4.51** |

इति ब्रह्मसूत्रेषु तृतीयस्याध्यायस्य चतुर्थः पादः समाप्तः

*********************************

## अथ ब्रह्मसूत्रेषु चतुर्थस्याध्यायस्य प्रथमः पादः

| 124 आवृत्त्यधिकरणम् | | |
|---|---|---|
| 470 | आवृत्तिरसकृदुपदेशात् | 4.1.1 |
| 471 | लिङ्गाच्च | 4.1.2 |

| 125 आत्मत्वोपासनाधिकरणम् | | |
|---|---|---|
| 472 | आत्मेति तूपगच्छन्ति ग्राहयन्ति च | 4.1.3 |

| 126 प्रतिकाधिकरणम् | | |
|---|---|---|
| 473 | न प्रतीके न हि सः | 4.1.4 |
| 474 | ब्रह्मदृष्टिरुत्कर्षात् | 4.1.5 |

| 127 आदित्यादिमत्यधिकरणम् | | |
|---|---|---|
| 475 | आदित्यादिमतयश्चाङ्ग उपपत्तेः | 4.1.6 |

| 128 आसीनाधिकरणम् | | |
|---|---|---|
| 476 | आसीनस्सम्भवात् | 4.1.7 |
| 477 | ध्यानाच्च | 4.1.8 |
| 478 | अचलत्वञ्चापेक्ष्य | 4.1.9 |

| | | |
|---|---|---|
| **479** | स्मरन्ति च | **4.1.10** |
| **480** | यत्रैकाग्रता तत्राविशेषात् | **4.1.11** |

| **129 आप्रायणाधिकरणम्** | | |
|---|---|---|
| **481** | आ प्रायणात् तत्रापि हि दृष्टम् | **4.1.12** |

| **130 तदधिगमाधिकरणम्** | | |
|---|---|---|
| **482** | तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् | **4.1.13** |

| **131 इतराधिकरणम्** | | |
|---|---|---|
| **483** | इतरस्याप्येवमसंश्लेषः पाते तु | **4.1.14** |

| **132 अनारब्धकार्याधिकरणम्** | | |
|---|---|---|
| **484** | अनारब्धकार्ये एव तु पूर्वे तदवधेः | **4.1.15** |

| **133 अग्निहोत्राद्यधिकरणम्** | | |
|---|---|---|
| **485** | अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् | **4.1.16** |
| **486** | अतोऽन्यदपि ह्येकेषामुभयोः | **4.1.17** |
| **487** | यदेव विद्ययेति हि | **4.1.18** |

| 134 इतरक्षपणाधिकरणम् | | |
|---|---|---|
| 488 | भोगेन त्वितरे क्षपयित्वाथ सम्पद्यते | 4.1.19 |

इति ब्रह्मसूत्रेषु चतुर्थस्याध्यायस्य प्रथमः पादः समाप्तः

*********************************

## अथ ब्रह्मसूत्रेषु चतुर्थस्याध्यायस्य द्वितीयः पादः

| 135 वागधिकरणम् | | |
|---|---|---|
| 489 | वाङ्मनसि दर्शनाच्छब्दाच्च | 4.2.1 |
| 490 | अत एव सर्वाण्यनु | 4.2.2 |

| 136 मनोऽधिकरणम् | | |
|---|---|---|
| 491 | तन्मनः प्राण उत्तरात् | 4.2.3 |

| 137 अध्यक्षाधिकरणम् | | |
|---|---|---|
| 492 | सोऽध्यक्षे तदुपगमादिभ्यः | 4.2.4 |

| 138 भूताधिकरणम् | | |
|---|---|---|
| 493 | भूतेषु तच्छ्रुतेः | 4.2.5 |
| 494 | नैकस्मिन् दर्शयतो हि | 4.2.6 |

| 139 आसृत्युपक्रमाधिकरणम् | | |
|---|---|---|
| 495 | समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य | 4.2.7 |
| 496 | तदपीतेस्संसारव्यपदेशात् | 4.2.8 |
| 497 | सूक्ष्मं प्रमाणतश्च तथोपलब्धेः | 4.2.9 |
| 498 | नोपमर्देनातः | 4.2.10 |
| 499 | अस्यैव चोपपत्तेरूष्मा | 4.2.11 |
| 500 | प्रतिषेधादिति चेन्न शारीरात्स्पष्टो ह्येकेषाम् | 4.2.13 |
| 501 | स्मर्यते च | 4.2.14 |

| 140 परसम्पत्त्यधिकरणम् | | |
|---|---|---|
| 502 | तानि परे तथा ह्याह | 4.2.15 |

| 141 अविभागाधिकरणम् | | |
|---|---|---|
| 503 | अविभागो वचनात् | 4.2.16 |

| 142 तदोकोऽधिकरणम् | | |
|---|---|---|
| 504 | तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीताश्शताधिकया | 4.2.17 |

| 143 रश्म्यनुसाराधिकरणम् | | |
|---|---|---|
| 505 | रश्म्यनुसारी | 4.2.18 |

| 144 निशाधिकरणम् | | |
|---|---|---|
| 506 | निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वात् दर्शयति च | 4.2.20 |

| 145 दक्षिणायनाधिकरणम् | | |
|---|---|---|
| 507 | अतश्चायनेऽपि दक्षिणे | 4.2.21 |
| 508 | योगिनः प्रति स्मर्यते स्मार्ते चैते | 4.2.22 |

इति ब्रह्मसूत्रेषु चतुर्थस्याध्यायस्य द्वितीयः पादः समाप्तः

**********************************

## अथ ब्रह्मसूत्रेषु चतुर्थस्याध्यायस्य तृतीयः पादः

| 146 अर्चिराद्यधिकरणम् | | |
|---|---|---|
| 509 | अर्चिरादिना तत्प्रथितेः | 4.3.1 |

| 147 वाय्वधिकरणम् | | |
|---|---|---|
| 510 | वायुमब्दादविशेषविशेषाभ्याम् | 4.3.2 |

| 148 वरुणाधिकरणम् | | |
|---|---|---|
| 511 | तटितोऽधि वरुणस्सम्बन्धात् | 4.3.3 |

| 149 अतिवाहिकाधिकरणम् | | |
|---|---|---|
| 512 | आतिवाहिकास्तल्लिङ्गात् | 4.3.4 |
| 513 | वैद्युतेनैव ततस्तच्छ्रुतेः | 4.3.6 |

| 150 कार्याधिकरणम् | | |
|---|---|---|
| 514 | कार्यं बादरिरस्य गत्युपपत्तेः | 4.3.7 |
| 515 | विशेषितत्वाच्च | 4.3.8 |
| 516 | सामीप्यात्तु तद्व्यपदेशः | 4.3.9 |
| 517 | कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् | 4.3.10 |
| 518 | स्मृतेश्च | 4.3.11 |
| 519 | परं जैमिनिर्मुख्यत्वात् | 4.3.12 |
| 520 | दर्शनाच्च | 4.3.13 |
| 521 | न च कार्ये प्रत्यभिसन्धिः | 4.3.14 |
| 522 | अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात् तत्क्रतुश्च | 4.3.15 |
| 523 | विशेषञ्च दर्शयति | 4.3.16 |

इति ब्रह्मसूत्रेषु चतुर्थस्याध्यायस्य तृतीयः पादः समाप्तः

**********************************

## अथ ब्रह्मसूत्रेषु चतुर्थस्याध्यायस्य चतुर्थः पादः

| | | |
|---|---|---|
| **151 सम्पद्याविर्भावाधिकरणम्** | | |
| **524** | सम्पद्याविर्भावस्स्वेन शब्दात् | **4.4.1** |
| **525** | मुक्तः प्रतिज्ञानात् | **4.4.2** |
| **526** | आत्मा प्रकरणात् | **4.4.3** |

| | | |
|---|---|---|
| **152 अविभागेन दृष्टत्वाधिकरणम्** | | |
| **527** | अविभागेनदृष्टत्वात् | **4.4.4** |

| | | |
|---|---|---|
| **153 ब्राह्माधिकरणम्** | | |
| **528** | ब्राह्मेण जैमिनिरुपन्यासादिभ्यः | **4.4.5** |
| **529** | चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः | **4.4.6** |
| **530** | एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः | **4.4.7** |

| | | |
|---|---|---|
| **154 सङ्कल्पाधिकरणम्** | | |
| **531** | सङ्कल्पादेव च तच्छ्रुतेः | **4.4.8** |

| | | |
|---|---|---|
| 532 | अत एव चानन्याधिपतिः | 4.4.9 |

| | | |
|---|---|---|
| **155 अभावाधिकरणम्** | | |
| 533 | अभावं बादरिराह ह्येवम् | 4.4.10 |
| 534 | भावं जैमिनिर्विकल्पामननात् | 4.4.11 |
| 535 | द्वादशाहवदुभयविधं बादरायणोऽतः | 4.4.12 |
| 536 | तन्वभावे सन्ध्यवदुपपत्तेः | 4.4.13 |
| 537 | भावे जाग्रद्वत् | 4.4.14 |
| 538 | प्रदीपवदावेशस्तथा हि दर्शयति | 4.4.15 |
| 539 | स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि | 4.4.16 |

| | | |
|---|---|---|
| **156 जगद्व्यापारवर्जाधिकरणम्** | | |
| 540 | जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च | 4.4.18 |
| 541 | प्रत्यक्षोपदेशान्नेति चेन्नाधिकारिकमण्डलस्थोक्तेः | 4.4.19 |
| 542 | विकारावर्ति च तथा हि स्थितिमाह | 4.4.20 |
| 543 | दर्शयतश्चैवं प्रत्यक्षानुमाने | 4.4.21 |
| 544 | भोगमात्रसाम्यलिङ्गाच्च | 4.4.22 |
| 545 | अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् | 4.4.23 |

इति ब्रह्मसूत्रेषु चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तः

॥ इति ब्रह्मसूत्रणि सम्पूर्णानि ॥

**सौत्रीसङ्ख्या शुभाशीः (545)**

**अधिकृतिगणना चिन्मयी (156)**